# shrIkaNThAShTakam

# શ્રીકણ્ઠાષ્ટકમ્

## Document Information

Text title : shrIkaNThAShTakam

File name : kaNThAShTakam.itx

Category : aShTaka, shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : November 7, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીકણ્ઠાષ્ટકમ્

(શ્રીગરલપુરે)

શ્રીગણેશાય નમઃ ॥

યઃ પાદપપિહિતતનુઃ પ્રકાશતાં પરશુરામેણ ।
નીતઃ સોઽવ્યાત્સતતં શ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૧॥

યઃ કાલં જિતગર્વં કૃત્વા ક્ષણતો મૃકણ્ડુમુનિસૂનુમ્ ।
નિર્ભયમકરોત્સોઽવ્યાચ્છ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૨॥

કુષ્ઠાપસ્મારમુખા રોગા યત્પાદસેવનાત્સહસા ।
પ્રશમં પ્રયાન્તિ સોઽવ્યાચ્છ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૩॥

યદવિદ્યૈવ જગદિદમખિલં પ્રતિભાતિ સત્યવત્પૂર્વમ્ ।
જ્ઞાનાત્સોઽવ્યાત્સતતં શ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૪॥

યમિવૃન્દવન્દ્યચરણઃ કમિતા ધરણીધરેન્દ્રતનયાયાઃ ।
શ્રીશાદિવન્દિતોઽવ્યાચ્છ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૫॥

યો દક્ષિણાસ્યરૂપં ધૃત્વા વિજ્ઞાનદાનકૃતદીક્ષઃ ।
મુગ્ધેભ્યોઽપિ સ પાયાચ્છ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૬॥

અન્ધોઽપિ યત્કરુણયા ચક્ષુષ્માન્ભવતિ સત્વરં લોકે ।
કરુણાનિધિઃ સ પાયાચ્છ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૭॥

કપિલાતટાદૃતગતિઃ કપિલાદિમુનીન્દ્રવન્દ્યપદપદ્મઃ ।
શ્રીદઃ પાયાત્સતતં શ્રીકણ્ઠઃ પાદનમ્રકલ્પતરુઃ ॥ ૮॥

શ્રીકણ્ઠાષ્ટકમેતત્પઠતિ જનો યઃ કૃતાદરઃ સતતમ્ ।
શ્રીવિદ્યાસદનં સ પ્રભવેન્નૈવાત્ર સન્દેહઃ ॥ ૯॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીકણ્ઠાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIkaNThAShTakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*